अथ उत्कलिकावल्लरीः

श्रीवृन्दारण्यविहारिणे नमः।

प्रपद्य वृन्दावनमध्यमेकः
क्रोशन्नसावुत्कलिकाकुलात्मा।
उद्घाटयामि ज्वलतः कठोरां
बाष्पस्य मुद्रां हृदि मुद्रितस्य॥१॥

अये वृन्दारण्य त्वरितमिह ते सेवनपराः
परामापुः के वा न किल परमानन्दपदवीम्।
अतो नीचैर्याचे स्वयमधिपयोरीक्षणविधेर्
वरेण्यां मे चेतस्युपदिश दिशं हा कुरु कृपाम्॥२॥

तवारण्ये देवि ध्रुवमिह मुरारिपोर्विहरते
सदा प्रेयस्येति श्रुतिरपि विरौति स्मृतिरपि।
इति ज्ञात्वा वृन्दे चरणमभिवन्दे तव कृपां
कुरुष्व क्षिप्रं मे फलतु नितरां तर्षविटपी॥३॥

हृदि चिरवसदाशामण्डलालम्बपादौ
गुणवति तव नाथौ नाथितुं जन्तुरेषः।
सपदि भवदनुज्ञां याचते देवि वृन्दे
मयि किर करुणार्द्रां दृष्टिमत्र प्रसीद॥४॥

दधतं वपुरंशुकन्दलीं
दलदिन्दीवरवृन्दबन्धुराम्।

कृतकाञ्चनकान्तिवञ्चनैः
स्फुरितां चारुमरीचिसञ्चयैः ॥५॥

निचितं घनचञ्चलाततेर्
अनुकूलेन दुकूलरोचिषा।
मृगनाभिरुचः सनाभिना
महितां मोहनपट्टवाससा ॥६॥

माधुरीं प्रकटयन्तमुज्ज्वलां
श्रीपतेरपि वरिष्ठसौष्ठवाम्।
इन्दिरामधुरगोष्ठसुन्दरी
वृन्दविस्मयकरप्रभोन्नताम् ॥७॥

इतरजनदुर्घटोदयस्य
स्थिरगुणरत्नचयस्य रोहणाद्रिम्।
अखिलगुणवतीकदम्बचेतः
प्रचुरचमत्कृतिकारिसद्गुणाढ्यम् ॥८॥

निस्तुलव्रजकिशोरमण्डली
मौलिमण्डनहरिन्मणीश्वरम्।
विश्वविस्फूरितगोकुलोल्लसन्
नव्ययौवतवतंसमालिकाम् ॥९॥

स्वान्तसिन्धुमकरीकृतराधं
हृन्निशाकरकुरङ्गितकृष्णाम्।
प्रेयसीपरिमलोन्मदचित्तं

प्रेष्ठसौरभहृतेन्द्रियवर्गाम् ॥१० ॥

प्रेममूर्तिवरकार्त्तिकदेवी
कीर्तिगानमुखरीकृतवंशाम् ।
विश्वनन्दनमुकुन्दसमज्ञा
वृन्दकीर्तनरसज्ञरसज्ञाम् ॥११ ॥

नयनकमलमाधुरीनिरुद्ध
व्रजनवयौवतमौलिहृन्मरालम् ।
व्रजपतिसुतचित्तमीनराज
ग्रहणपटिष्ठविलोचनान्तजालाम् ॥१२ ॥

गोपेन्द्रमित्रतनयाध्रुवधैर्यसिन्धु
पानक्रियाकलससम्भववेणुनादम् ।
विद्यामहिष्ठमहतीमहनीयगान
संमोहिताखिलविमोहनहृत्कुरङ्गाम् ॥१३ ॥

क्वाप्यानुसङ्गिकतयोदितराधिकाख्या
विस्मारिताखिलविलासकलाकलापम् ।
कृष्णेतिवर्णयुगलश्रवणानुबन्ध
प्रादुर्भवज्जडिमडम्बरसंविताङ्गीम् ॥१४ ॥

त्वां च वल्लवपुरन्दरात्मज
त्वां च गोकुलवरेण्यनन्दिनि ।
एष मूर्ध्नि रचिताञ्जलिर्नयन्
भिक्षते किमपि दुर्भगो जनः ॥१५ ॥

हन्त सान्द्रकरुणासुधाझरी
पूर्णमानसहृदौ प्रसीदतम् ।
दुर्जनेऽत्र दिशतं रते निज
प्रेक्षणप्रतिभुवश्छटामपि ॥१६ ॥

श्यामयोर्नववयःसुषमाभ्यां
गौरयोरमलकान्तियशोभ्याम् ।
क्वापि वामखिलवल्गुवतंसौ
माधुरी हृदि सदा स्फुरतान्मे ॥१७ ॥

सर्ववल्लववरेण्यकुमारौ
प्रार्थये बत युवां प्रणिपत्य ।
लीलया वितरतं निजदास्यं
लीलया वितरतं निजदास्यम् ॥१८ ॥

प्रणिपत्य भवन्तमर्थये
पशुपालेन्द्रकुमार काकुभिः ।
व्रजयौवतमौलिमालिका
करुणापात्रमिमं जनं कुरु ॥१९ ॥

भवतीमभिवाद्य चाटुभिर्
वरमूर्जेश्वरि वर्यमर्थये ।
भवदीयतया कृपां यथा
मयि कुर्यादधिकां बकान्तकः ॥२० ॥

दिशि विदिशि विहारमाचरन्तः
सह पशुपालवरेण्यनन्दनाभ्याम् ।
प्रणयिजनगणास्तयोः कुरुध्वं
मयि करुणां बत काकुमाकलय्य ॥२१ ॥

गिरिकुञ्जकुटीरनागरौ
ललिते देवि सदा तवाश्रवौ ।
इति ते किल नास्ति दुष्करं
कृपयाङ्गीकुरु मामतः स्वयम् ॥२२ ॥

भाजनं वरमिहासि विशाखे
गौरनीलवपुषोः प्रणयानाम् ।
त्वं निजप्रणयिनोर्मयि तेन
प्रापयस्व करुणार्द्रकटाक्षम् ॥२३ ॥

सुबल वल्लववर्यकुमारयोर्
दयितसखस्त्वमसि व्रजे ।
इति तयोः पुरतो विधुरं जनं
क्षणममुं कृपयाद्य निवेदय ॥२४ ॥

शृणुत कृपया हन्त प्राणेशयोः प्रणयोद्धुराः
किमपि यदयं दीनः प्राणी निवेदयति क्षणम् ।
प्रवणितमनाः किं युष्माभिः समं तिलमप्यसौ
युगपदनयोः सेवां प्रेम्णा कदापि विधास्यति ॥२५ ॥

क्व जनोऽयमतीव पामरः

क्व दुरापं रतिभाग्भिरप्यदः ।
इयमुल्लयत्यजर्जरा गुरुर्
उत्तर्षधुरा तथापि माम् ॥२६ ॥

ध्वन्तब्रह्ममरालकूजितभरैरूर्जेश्वरीनूपुर
क्वानैरूर्जितवैभवस्तव विभो वंशीप्रसूतः कलः ।
लब्धः शस्तसमस्तनादनगरीसाम्राज्यलक्ष्मीं पराम्
आराध्यः प्रणयात्कदा श्रवणयोर्द्वन्द्वेन मन्देन मे ॥२७ ॥

स्तम्भं प्रपञ्चयति यः शिखिपिञ्छमौलि
वेणोरपि प्रवलयन्स्वरभङ्गमुच्चैः ।
नादः कदा क्षणमवाप्स्यति ते महत्या
वृन्दावनेश्वरि स मे श्रवणातिथित्वम् ॥२८ ॥

कस्य सम्भवति हा तदहर्वा
यत्र वां प्रभुवरौ कलगीतिः ।
उन्नमन्मधुरिमोर्मिसमृद्धा
दुष्कृतं श्रवणयोर्विधुनोति ॥२९ ॥

परिमलसरणिर्वां गौरनीलाङ्गराजन्
मृगमदघुसृणानुग्राहिणी नागरेशौ ।
स्वमहिमपरमाणुप्रावृताशेषगन्धा
किमिह मम भवित्री घ्राणभृङ्गोत्सवाय ॥३० ॥

प्रदेशिनीं मुखकुहरे विनिक्षिपन्
जनो मुहुर्वनभुवि फुत्करोत्यसौ ।

प्रसीदतं क्षणमधिपौ प्रसीदतं
दृशोः पुरः स्फुरतु तडिद्घनच्छविः ॥३१ ॥

व्रजमधुरजनव्रजावतंसौ
किमपि युवामभियाचते जनोऽयम् ।
मम नयनचमत्कृतिं करोतु
क्षणमपि पादनखेन्दुकौमुदी वाम् ॥३२ ॥

अतर्कितसमीक्षणोल्लसितया मुदा श्लिष्यतोर्
निकुञ्जभवनाङ्गने स्फुरितगौरनीलाङ्गयोः ।
रुचः प्रचुरयन्तु वां पुरटयूथिकामञ्जरी
विराजदलिरम्ययोर्मम चमत्कृतिं चक्षुषोः ॥३३ ॥

साक्षात्कृतिं बत ययोर्न महत्तमोऽपि
कर्तुं मनस्यपि मनाक्प्रभुतामुपैति ।
इच्छन्नयं नयनयोः पथि तौ भवन्तौ
जन्तुर्विजित्य निजगार भियं ह्रियं च ॥३४ ॥

अथवा मम किं नु दूषणं
बत वृन्दावनचक्रवर्तिनौ ।
युवयोर्गुणमाधुरी नवा
जनमुन्मादयतीव कं न वा ॥३५ ॥

अहह समयः सोऽपि क्षेमो घटेत नरस्य किं
व्रजनटवरौ यत्रोद्दीप्ता कृपासुधयोज्ज्वला ।
कृतपरिजनश्रेणिचेतश्चकोरचमत्कृतिर्

व्रजति युवयोः सा वक्त्रेन्दुद्वयी नयनाध्वनि ॥३६ ॥

प्रियजनकृतपार्ष्णिग्राहचर्योन्नताभिः
सुगहनघटनाभिर्वक्रिमाडम्बरेण ।
प्रणयकलहकेलिक्ष्वेलिभिर्वामधीशौ
किमिह रचयितव्यः कर्णयोर्विस्मयो मे ॥३७ ॥

निभृतमपहृतायामेतया वंशिकायां
दिशि दिशि दृशमुत्कां प्रेर्य सम्पृच्छमानः ।
स्मितशवलमुखीभिर्विप्रलब्धः सखीभिस्
त्वमघहर कदा मे तुष्टिमक्ष्णोर्विधत्से ॥३८ ॥

क्षतमधरदलस्य स्वस्य कृत्वा त्वदाली
कृतमिति ललितयां देवि कृष्णे ब्रुवाणे ।
स्मितशवलदृगन्ता किञ्चिदुत्तम्भितभ्रूर्
मम मुदमुपधास्यत्यास्यलक्ष्मीः कदा ते ॥३९ ॥

कथमिदमपि वाञ्छितुं निकृष्टः
स्फुटमयमर्हति जन्तुरुत्तमार्हम् ।
गुरुलघुगणनोज्झितार्तनाथौ
जयतितरामथवा कृपाद्युतिर्वाम् ॥४० ॥

वृत्ते दैवाद्व्रजपतिसुहृन्नन्दिनीविप्रलम्भे
संरम्भेणोल्ललित ललिताशङ्कयोद्भ्रान्तनेत्रः ।
त्वं शारीभिः समयपटुभिर्द्रागुपालभ्यमानः
कामं दामोदर मम कदा मोदमक्ष्णोर्विधाता ॥४१ ॥

रासारम्भे विलसति परित्यज्य गोष्ठाम्बुजाक्षी
वृन्दं वृन्दावनभुवि रहः केशवेनोपनीय।
त्वां स्वाधीनप्रियतमपदप्रापणेनार्चिताङ्गीं
दूरे दृष्ट्वा हृदि किमचिरादर्पयिष्यामि दर्पम् ॥४२॥

रम्या शोणद्युतिभिरलकैर्यावकेनोर्जदेव्याः
सद्यस्तन्द्रीमुकुलदलसङ्क्रान्तनेत्रा व्रजेश।
प्रातश्चन्द्रावलीपरिजनैः साचि दृष्टा विवर्णैर्
आस्यश्रीस्ते प्रणयति कदा संमदं मे मुदं च ॥४३॥

व्यात्युक्षीरभसोत्सवेऽधरसुधापानग्लहे प्रस्तुते
जित्वा पातुमथोत्सुकेन हरिणा कण्ठे धृतायाः पुरः।
ईषच्छोणिममीलिताक्षमनृजुभ्रूवल्लिहेलोन्नतं
प्रेक्षिष्ये तव सस्मितं सरुदितं तद्देवि वक्त्रं कदा ॥४४॥

आलीभिः सममभ्युपेत्य शनकैर्गान्धर्विकायां मुदा
गोष्ठाधीशकुमार हन्त कुसुमश्रेणीं हरन्त्यां तव।
प्रेक्षिष्ये पुरतः प्रविश्य सहसा गूढस्मितास्यं बलाद्
आच्छिन्दानमिहोत्तरीयमुरसस्त्वां भानुमत्याः कदा ॥४५॥

उदञ्चति मधूत्सवे सहचरीकुलेनाकुले कदा
त्वमवलोक्यसे व्रजपुरन्दरस्यात्मज।
स्मितोज्ज्वलमदीश्वरीचलदृगञ्चलप्रेरणान्
निलीनगुणमञ्जरीवदनमत्र चुम्बन्मया ॥४६॥

कलिन्दतनयातटिवनविहारतः श्रान्तयोः
स्फुरन्मधुरमाधवीसदनसीम्नि विश्राम्यतोः।
विमुच्य रचयिष्यते स्वकचवृन्दमत्रामुना
जनेन युवयोः कदा पदसरोजसन्मार्जनम् ॥४७॥

परिमिलदुपबर्हं पल्लवश्रेणिभिर्वां
मदनसमरचर्याभारपर्याप्तमत्र।
मृदुभिरमलपुष्पैः कल्पयिष्यामि तल्पं
भ्रमरयुजि निकुञ्जे हा कदा कुञ्जराजौ ॥४८॥

अलिद्युतिभिराहृतैर्मिहिरनन्दिनीनिर्झरात्
पुरः पुरटझर्झरीपरिभृतैः पयोभिर्मया।
निजप्रणयिभिर्जनैः सह विधास्यते वां कदा
विलासशयनस्थयोरिह पदाम्बुजक्षालन ॥४९॥

लीलातल्पे कलितवपुषोर्व्यावहासीमनल्पां
स्मित्वा स्मित्वा जयकलनया कुर्वतोः कौतुकाय।
मध्ये कुञ्जं किमिह युवयोः कल्पयिष्याम्यधीशौ
सन्धारम्भे लघु लघु पदाम्भोजसंवाहनानि ॥५०॥

प्रमदमदनयुद्धारम्भसम्भावुकाभ्यां
प्रमुदितहृदयाभ्यां हन्त वृन्दावनेशौ।
किमहमिह युवाभ्यां पानलीलोन्मुखाभ्यां
चषकमुपहरिष्ये साधु माध्वीकपूर्णम् ॥५१॥

कदाहं सेविष्ये व्रततिचमरीचामरमरुद्

विनोदेन क्रीडाकुसुमशयने न्यस्तवपुषौ ।
दरोन्मीलन्नेत्रौ श्रमजलकणक्लिद्यदलकौ
ब्रुवाणावन्योन्यं व्रजनवयुवानाविह युवाम् ॥५२ ॥

च्युतशिखरशिखण्डं किञ्चिदुत्स्रंसमानां
विलुठदमलपुष्पश्रेणिमुन्मुच्य चूडाम् ।
दनुजदमन देव्याः शिक्षया ते कदाहं
कमलकलितकोटिं कल्पयिष्यामि वेणीम् ॥५३ ॥

कमलमुखि विलासैरंसयोः स्रंसितानां
तुलितशिखिकलापं कुन्तलानां कलापम् ।
तव कवरतयाविर्भाव्य मोदात्कदाहं
विकचविचकिलानां मालयालङ्करिष्ये ॥५४ ॥

मिथःस्पर्धाबद्धे बलवति वलत्यक्षकलहे
व्रजेश त्वां जित्वा व्रजयुवतिधम्मिल्लमणिना ।
दृगन्तेन क्षिप्ताः पणमिह कुरङ्गं तव कदा
ग्रहीष्यामो बद्धा कलयति वयं तत्प्रियगणे ॥५५ ॥

किं भविष्यति शुभः स वासरो
यत्र देवि नयनाञ्चलेन माम् ।
गर्वितं विहसितुं नियोक्ष्यसे
द्यूतसंसदि विजित्य माधवम् ॥५६ ॥

किं जनस्य भवितास्य तद्दिनं
यत्र नाथ मुहुरेनमादृतः ।

त्वं व्रजेश्वरवयस्यनन्दिनी
मानभङ्गविधिमर्थयिष्यसे ॥५७ ॥

त्वदादेशं शारीकथितमहमाकर्ण्य मुदितो
वसामि त्वत्कुण्डोपरि सखि विलम्बस्तव कथम् ।
इतीदं श्रीदामस्वसरि मम सन्देशकुसुमं
हरेति त्वं दामोदर जनममुं नोत्स्यसि कदा ॥५८ ॥

शठोऽयं नावेक्ष्य पुनरिह मया मानधनया
विशन्तं स्त्रीवेशं सुबलसुहृदं वारय गिरा ।
इदं ते साकूतं वचनमवधार्योच्छलितधीश्
छलाटोपैर्गोपप्रवरमवरोत्स्यामि किमहम् ॥५९ ॥

अघहर बलीवर्दः प्रेयान्नवस्तव यो व्रजे
वृषभवपुषा दैत्येनासौ बलादभियुज्यते ।
इति किल मृषागीर्भिश्चन्द्रावलीनिलयस्थितं
वनभुवि कदा नेष्यामि त्वां मुकुन्द मदीश्वरीम् ॥६० ॥

निगिरति जगदुच्चैः सूचिभेद्ये तमिस्रे
भ्रमररुचिनिचोलेनाङ्गमावृत्य दीप्तम् ।
परिहृतमणिकाञ्चीनूपुरायाः कदाहं
तव नवमभिसारं कारयिष्यामि देवि ॥६१ ॥

आस्ये देव्याः कथमपि मुदा न्यस्तमास्यात्त्वयेश
क्षिप्तं पर्णे प्रणयजनिताद्देवि वाम्यात्त्वयाग्रे ।
आकूतज्ञस्तदतिनिभृतं चर्वितं खर्विताङ्गस्

ताम्बूलीयं रसयति जनः फुल्लरोमा कदायम् ॥६२ ॥

परस्परमपश्यतोः प्रणयमानिनोर्वां कदा
धृतोत्केलिकयोरपि स्वमभिरक्षतोराग्रहम् ।
द्वयोः स्मितमुदञ्चये नुदसि किं मुकुन्दामुना
दृगन्तनटनेन मामुपरमेत्यलीकोक्तिभिः ॥६३ ॥

कदाप्यवसरः स मे किमु भविष्यति स्वामिनौ
जनोऽयमनुरागतः पृथुनि यत्र कुञ्जोदरे ।
त्वया सह तवालिके विविधवर्णगन्धद्रव्यैश्
चिरं विरचयिष्यति प्रकटपत्रवल्लीश्रियम् ॥६४ ॥

इदं सेवाभाग्यं भवति सुलभं येन युवयोश्
छटाप्यस्य प्रेम्णः स्फुरति नहि सुप्तावपि मम ।
पदार्थेऽस्मिन्युष्मद्व्रजमनु निवासेन जनितस्
तथाप्याशाबन्धः परिवृढवरौ मां द्रढयति ॥६५ ॥

प्रपद्य भवदीयतां कलितनिर्मलप्रेमभिर्
महद्भिरपि काम्यते किमपि यत्र तार्णं जनुः ।
कृतात्र कुजनेरपि व्रजवने स्थितिर्मे यया
कृपां कृपणगामिनीं सदसि नौमि तामेव वाम् ॥६६ ॥

माधव्या मधुराङ्ग काननपदप्राप्ताधिराज्यश्रिया
वृन्दारण्यविकासिसौरभतते तापिञ्छकल्पद्रुम ।
नोत्तापं जगदेव यस्य भजते कीर्तिच्छटाच्छायया
चित्रा तस्य तवाङ्घ्रिसंनिधिजुषां किं वा फलाप्तिर्नृणाम् ॥६७ ॥

त्वल्लीलामधुकुल्ययोल्लसितया कृष्णाम्बुदस्यामृतैः
श्रीवृन्दावनकल्पवल्लिपरितः सौरभ्यविस्फारया ।
माधुर्येण समस्तमेव पृथुना ब्रह्माण्डमप्यायितं
नाश्चर्यं भुवि लब्धपादरजसां पर्वोन्नतिर्वीरुधाम् ॥६८ ॥

पशुपालवरेण्यनन्दनौ
वरमेतं मुहुरर्थये युवाम् ।
भवतु प्रणयो भवे भवे
भवतोरेव पदाम्बुजेषु मे ॥६९ ॥

उद्गीर्णाभूदुत्कलिकावल्लरिरग्रे
वृन्दाटाव्यां नित्यविलासव्रतयोर्वाम् ।
वाङ्मात्रेण व्याहरतोऽप्युल्ललमेताम्
आकर्ण्येशौ कामितसिद्धिं कुरुतं मे ॥७० ॥

चन्द्राश्वभुवने शाके पौषे गोकुलवासिना ।
इयमुत्कलिकापूर्वा वल्लरी निर्मिता मया ॥७१ ॥

१४७१ शकाब्दे १५५० खृष्टाब्दे

इत्युत्कलिकावल्लरी समाप्ता ॥